# कीलक स्तोत्रम्

ॐ नमश्चण्डिकायै ।

मार्कण्डेय उवाच ।
ॐ विशुद्ध ज्ञान देहाय त्रिवेदी दिव्य चक्षुषे ।
श्रेयः प्राप्ति निमित्ताय नमः सोमार्ध धारिणे ॥ १॥

सर्वमेत द्विजानीयान् मन्त्राणामभि कीलकम् ।
सोऽपि क्षेम मवाप्नोति सततं जाप्यतत्परः ॥ २॥

सिद्ध्यन्त्युच्चाट नादीनि वस्तूनि सकलान्यपि ।
एतेन स्तुवतां देवी स्तोत्र मात्रेन सिद्ध्यति ॥ ३॥

न मन्त्रो नौषधं तत्र न किञ्चि दपि विद्यते ।
विना जाप्येन सिद्ध्येत सर्व मुच्चाट नादिकम् ॥ ४॥

समग्राण्यपि सिद्ध्यन्ति लोकशङ्का मिमां हरः ।
कृत्वा निमन्त्रयामास सर्वमेव मिदं शुभम् ॥ ५॥

स्तोत्रं वै चण्डिकायास्तु तच्च गुप्तं चकार सः ।
समाप्तिर्न च पुण्यस्य तां यथाव न्नियन्त्रणाम् ॥ ६॥

सोऽपि क्षेम मवाप्नोति सर्वमेवं न संशयः ।
कृष्णायां वा चतुर्दश्यां अष्टम्यां वा समाहितः ॥ ७॥

ददाति प्रतिगृह्णाति नान्यथैषा प्रसीदति ।
इत्थं रूपेण कीलेन महादेवेन कीलितम् ॥ ८॥

यो निष्कीलां विधायैनां नित्यं जपति संस्फुटम् ।
स सिद्धः स गणः सोऽपि गन्धर्वो जायते नरः ॥ ९॥

न चैवाप्यटतस्तस्य भयं क्वापीह जायते ।
नापमृत्यु वशं याति मृतो मोक्ष मवाप्नुयात् ॥ १०॥

ज्ञात्वा प्रारभ्य कुर्वीत नकुर्वाणो विनश्यति ।
ततो ज्ञात्वैव सम्पन्नं इदं प्रारभ्यते बुधैः ॥ ११॥

सौभाग्यादि च यत्किञ्चिद् दृश्यते ललनाजने ।
तत्सर्वं तत्प्रसादेन तेन जाप्यमिदं शुभम् ॥ १२॥

शनैस्तु जप्यमानेऽस्मिन् स्तोत्रे सम्पत्ति रुच्चकैः ।
भवत्येव समग्रापि ततः प्रारभ्य मेव तत् ॥ १३॥

ऐश्वर्यं यत्प्रसादेन सौभाग्यारोग्य सम्पदः ।
शत्रुहानिः परो मोक्षः स्तूयते सा न किं जनैः ॥ १४॥

॥ इति श्रीकीलक स्तोत्रं समाप्तम् ॥